SHATKARAKAM
(षट्कारकम्)

Written by: Rabhasananda
Edited by : Dr. Dhaval Patel (I.A.S.)

Editorial

This is probably a hitherto unpublished book related to Sanskrit Grammar ascribed to an author known as Rabhasananda (रभसनंद). The author seems to be a Buddhist, as can be seen by the examples such as जयति बुद्धधर्मः. Nothing else is mentioned about the author in manuscripts.

The present work is edition of two manuscripts belonging to the Hemchandracharya Granth Bhandar, Patan. One manuscript has two books combined. One is Shatkarakam and the other is kriyakalapa. I have taken that manuscript as base. Whereas the other manuscript is of this book only. But that manuscript has very congested letters. Therefore I have taken it as supplement and mentioned in footnote wherever it differs from the first manuscript. The punctuation marks are more precise in the second manuscript. Therefore I have borrowede punctuation marks from the second manuscript.

I would like to give special thanks to Mr. Yatin Shah, who is the trustee of this beautiful library for allowing me access to these books. I would also like to extend my gratitude to Maharaj Saheb Shri Mahavidehaji for his guidance in manuscript reading.

This book is a book on grammar and I am a beginner in manuscript reading. At some places, I have not been able to decipher conjoints. If some grammarian brings any discrepancies and possible solutions, it can be corrected in the next edition of book.

Hope this effort be of some use to Sanskrit language.

Yours Sincerely,
Dr. Dhaval Patel

Place: Patan (North Gujarat)
Date: 21/05/2011

षट्कारकम्

नग्नं मारबलं येन निर्जितं भवपंजरम् ।
निर्वाणपदमारुढं तं बुद्धं प्रणमाम्यहम् ॥ १ ॥
षट्कारकाणि संबंध उक्तानुक्ततया द्विधा ।
विभक्तिश्चेति निश्चेयमवश्यं योगमिच्छता ॥ २ ॥
यो यत्र प्रत्ययो जातः समासो यत्र वा भवेत् ।

स एव[1] वक्ति युञ्जानस्तस्य लिंगेन संख्यया ॥ ३ ॥
लिंगसंख्याभियोगश्च प्रायो भवति दर्शितः ।
वेदाः प्रमाणमित्यादि प्रयोगो येन सम्मतः ॥ ४ ॥
मुख्यं कर्तारमाचष्टे प्रत्ययोऽनेककर्तृको ।
मुख्यः प्रयोजको ज्ञेयः प्रयुक्तो नापरैर्यदि ।। ५ ॥
दुहादेर्गौणकं कर्म नीवहादेः प्रधानकम् ।
इनंते कर्तृकर्मैव अन्यद्वा वक्ति कर्मजः ॥ ६॥
गमनाहारबोधार्थशब्दार्थाः कर्मधातुषु ।
अनिनंतेषु यः कर्ता स्यादिनंतेषु कर्म तत् ॥ ७ ॥
न नीखाद्यऽदिशब्दाय क्रंदाह्वा कर्तृकर्मकाः ।
तथा भक्षिरहिंसायां वहो सारथिकर्तृकः ॥ ८ ॥
हक्रोरपि तथा कर्ता इनंते कर्म वा भवेत् ।
अभिवादिदृशोरेवमात्मने विषये परम् ॥ ९ ॥
उक्तादन्यदनुक्तं स्यादुक्त स्यात्प्रथमैव हि ।
अनुक्ते तु भवन्त्यन्या द्वितीयाद्या यथायथम् ॥ १० ॥
कर्तृसंज्ञे तृतीया स्यात् द्वितीया कर्मकारके ।
तयोरथ भवेत्षष्ठी कृतिनिष्ठादिवर्जिते ॥ ११ ॥
एकदत्ते भयप्राप्तौ[2] कर्मण्येव न कर्तरि ।
अकाकारप्रयोगे[3] तु षष्ठी स्यादुभयोरपि ॥ १२ ॥
प्रायसः कथिता एव दृश्यंते कर्तृकर्मणोः ।
यथाऽभिधानमन्यासां प्रवृत्तिर्न निराकृता ॥ १३ ॥
तृतीया करणे प्रायश्चतुर्थी संप्रदानतः ।
पंचमी स्यादपादाने तथाऽधारे तु[4] सप्तमी ॥ १४ ॥
संबंधेऽथ भवेत्षष्ठी निर्नयस्तावदीदृशः ।
उक्तानुक्तविचारेण प्रयोगस्तेन गम्यताम् ॥ १५ ॥

१.
नग्नं मारबलं येन निर्जितं भवपंजरम् ।
निर्वाणपदमारुढं तं बुद्धं प्रणमाम्यहम् ॥ १ ॥

इहायं कर्ता बालव्युत्पत्तये संक्षेपतः संबंधमभिदधानः प्रस्तुवन्नाह ॥

---

[1] एनं

[2] एकदा तूभयप्राप्तौ

[3] अकारकप्रयोगे च

[4] च

२.

षट्कारकाणि संबंध उक्तानुक्ततया द्विधा ।
विभक्तिश्चेति निश्चेयमवश्यं योगमिच्छता ॥ २ ॥

षट्कारकाणि इत्यादि[5] । अस्यायमर्थः । योगं संबंधमिच्छता च्छात्रेणावश्यमेवेति निश्चेयमिति यावत् कतमत् तत्राह[6] । षट्कारकाणीति[7] संबंध उक्तानुक्ततया द्विधा विभक्तिश्चेति । अयमभिप्रायः । षट्कारकाणि । कर्तृकर्मकरणसंप्रदानापादानाधिकरणनामानि प्रत्येकमुक्तानुक्ततया द्विधा द्विप्रकाराणि वर्तते । तथा संबंधोऽपि । तद्यथा । उक्तः कर्ता । अनुक्तः कर्ता । उक्तं कर्म । अनुक्तं कर्म । उक्तं करणम् । अनुक्तं करणम् । उक्तं संप्रदानम् । अनुक्तं संप्रदानम् । उक्तमपादानम् । अनुक्तमपादानम् । उक्तमधिकरणम् । अनुक्तमधिकरणम् । उक्तः संबंधः । अनुक्तः संबंधः ।

(१) इति[8] तत्र उक्तः कर्ता यथा । जयति बुद्धधर्मः । ज्वलति हुताशनः । एधते विधुः । कारको देवदत्तः । वैयाकरणः पुरुषः । कृतः प्रणामो येन स कृतप्रणामः पुरुषः [9]। एवमादिषु आख्यातकृत्तद्धितप्रत्ययानां समासस्य च कर्तरि विहितत्वादुक्तः कर्तेत्युच्यते। उक्ते कर्तरि प्रथमेति[10] न्यायात्प्रथमा ।

(२) अनुक्ते कर्तरि[11] जीयते बुद्धधर्मेण । ज्वल्यते हुताशनेन । ऐध्यते विधुना । कृतं देवदत्तेन । (सकर्मकस्यापि यदि कर्म न विवक्ष्यते तदा भावे प्रत्यय)[12] एवमादिषु प्रत्ययो न कर्तरि विहित इत्यनुक्तत्वात्कर्तरि तृतीया[13] ।

(३) उक्तं कर्म यथा ।

कटः क्रियते । उदनः पच्यते । ग्रामो गम्यते । भुक्त उदनः । शतिकः पटः । आरुढवानरो वृक्षः । एवमादिषु प्रत्ययानां समासस्य च कर्मविहितत्वात्[14] । उक्तं प्रथमा कर्मेत्युच्यते । उक्ते कर्मणि प्रथमेति[15] न्यायात् ।

(४) अनुक्तं कर्म यथा ।

कटं करोति । उदनं पचति । ग्रामं गच्छति । उदनं भुक्तवान् । एवमादिषु प्रत्ययो न कर्मणि विहित इति अनुक्तत्वात्कर्मणि द्वितीया[16] ।

(५) उक्तं करणं यथा ।

स्नानीयं वर्णम् । अस्यार्थः । स्नायते येन वर्णेन तत्स्नानीयम् । कृत्युटोऽन्यत्रापीति वचनात्[17] । करणेऽनीयः एवमादिकमुक्तं करणमुच्यते उक्तत्वात्करणे प्रथमा[18] ।

(६) अनुक्तं करणं यथा ।

---

[5] षट्कारकाणीत्यादि

[6] कतमत्तत्राह

[7] षट्कारकाणि

[8] पाठान्तरे नास्ति

[9] कृतप्रणामो जनः एवास्ति

[10] प्रथमैवेति

[11] अनुक्तः कर्म यथा

[12] पाठांतरे नास्ति । उचितमेव ।

[13] विहित इत्यनुक्तः कर्ता । अनुक्तत्वात्कर्तरि तृतीया ।

[14] करम्णि विहितत्वात्

[15] प्रथमैवेति

[16] अनुक्तं कर्म । अनुक्तत्वाद्कर्मणि द्वितीया ?

[17] पाठांतरे वचनान्नास्ति

[18] करणे अनीयः प्रत्ययः एवमादिषु उक्तं करणमुच्यते उक्तार्थत्वात्करणे प्रथमा ।

स्नाति वर्णेन । असिना छिनत्ति । मनसा मेरुं गम्यते । अथवा स्नायते वर्णेन । असिना च्छिद्यते । मनसा गम्यते इत्यादिषु करणे प्रत्ययो न विहित इत्यनुक्तत्वात्करणे तृतीया[19] ।

(७) उक्तं संप्रदानम् ।

यथा दानीयो ब्राह्मणः । अयमर्थः । दीयते यस्मै ब्राह्मणाय स दानीय इति कृत्युटोऽन्यत्रापि चेति वचनात्संप्रदाने अनीयः । एवं दक्षिणीयः[20] ब्राह्मणः । दक्षिणा यस्मै दीयते[21] स दक्षिणीयः । ईयस्तु हिते इति योगविभागादिह संप्रदाने ईयः । एवं दत्तभोजनोऽतिथिः । समासोऽत्र संप्रदने एवमादिकमुक्तत्वात्संप्रदाने[22] प्रथमा ।

(८) अनुक्तं संप्रदानं यथा ।

ददाति ब्राह्मणाय । अथवा दीयते ब्राह्मणाय । एवं दातव्यं ब्राह्मणाय । एवमादिषु प्रत्ययो न संप्रदाने विहितः[23] इति अनुक्तत्वात् संप्रदने चतुर्थी ।

(९) उक्तमपादानम् [24] ।

भीमो राक्षसः । बिभेत्यस्मादिति भीमः[25] भीमादयोऽपादाने इति भीभीषिभ्यां मक् उणादिकः । एवं उशन्नजनपदो[26] देशः समासोऽपादाने एवमादिषूक्तत्वादपादाने प्रथमा ।

(१०) अनुक्तमपादानं यथा ।

बिभेति राक्षसात् । अथवा भीयते राक्षसात् । एवं भीतो राक्षसात् । नात्रापादाने प्रत्ययो[27] विहित इत्यनुक्तत्वात् अपादाने पंचमी ।

(११) ऊ क्ताधिकरणं यथा ।

आसनं पीठम् ‘ अयमर्थः । आस्यते यस्मिन्निति आसनम्[28] । करणाधिकरणयोश्चेति अधिकरणे युट् । एवं वटकिनी पूर्णिमासी[29] प्रायेण वटका भुज्यंते यस्यां पूर्णिमास्यां[30] तद्धितो रुढित इतीन् । एवं मत्तमातंगं वनं समासोऽधिकरणे एवमादिषूक्तत्वादधिकरणे प्रथमा[31] ।

(१२) अनुक्तमधिकरणं यथा ।

आस्ते पीठे । अथवा आस्यते पीठे । एवमासितं पीठे । गंगायां घोषः तिलेषु तैलम् । दिवि देवाः । एवमादिषु न कश्चित् अधिकरणे प्रत्ययो विहितः[32] । इत्यनुक्तत्वादधिकरणे सप्तमी ।

(१३) ऊक्त संबंध[33] यथा ।

---

[19] इत्यनुक्तं करणं अनुक्तत्वात्करणे तृतीया ।

[20] दक्षिणीयो

[21] दक्षिणा दीयते यस्मै

[22] एवमादिषु उक्तत्वात्

[23] संप्रदाने न विहित

[24] उक्तमपादानं यथा

[25] भीमः पाठांतरे नास्ति

[26] उच्छिन्नजनपदो ।

[27] नात्र प्रत्ययोऽपादाने

[28] यस्मिन्तदासनम्

[29] पौर्णिमा

[30] परुर्णिमास्यामित्यर्थ

[31] समासोऽत्राधिकरणे

[32] प्रत्ययोऽधिकरणे न विहित

गोमान् देवदत्तः । अयमर्थः । गावो विध्यंते यस्य स गोमान् । तदस्यास्तीति [34] संबंधे मतुप्रत्ययः । एवं चित्रगुर्देवदत्तः समासोऽत्र संबंधे । अत एवमादिषूक्तत्वात्संबंधे प्रथमा ।

(१४) अनुक्तः संबंधो यथा ।

गावो विध्यंते यस्य देवदत्तस्य । अथवा गोभिर्विद्यते देवदत्तस्य । एवं राज्ञः पुरुषः । वृक्षस्य शाखा । एवमादिष्वनुक्तत्वात्संबंधे षष्ठी ।

उक्तानुक्तयोर्दिग्मात्रमिदम् । प्रपंचस्तु[35] यथास्थानमुत्तरत्र दर्शयिष्यामः । ननु को नाम कारकषट्कं संबंधं च[36] वक्ति ।

३.

यो यत्र प्रत्ययो जातः समासो यत्र वा भवेत् ।
स एव[37] वक्ति युञ्जानस्तस्य लिंगेन संख्यया ॥ ३ ॥

यो यत्रेत्यादि । अयमर्थः । यः प्रत्ययस्तद्धितस्त्यादिः कृद्वा यत्रार्थे कारके संबंधे[38] न जातः । समासो[39] यत्रार्थे भवेत् । स प्रत्ययः । समासश्च एनमिति यत्रार्थः विहितस्तमर्थं वक्ति । किंभूतो भवन् वक्ति तत्राह । युञ्जानः संबंध्यमानस्तस्योक्तस्य लिंगेन स्त्रीपुंनपुंसकेन संख्यया[40] एकवचनद्विवचनबहुवचनैरिति अयमभिप्रायः । यो यमर्थमभिदधाति स तस्यैव लिंगसंख्याभ्यां युक्तो भवति । तद्यथा । कारकः पुरुषः । कारिका स्त्री । कारकं कुलमिति । वैयाकरणः पुरुषः । वैयाकरणी स्त्री । वैयाकरणं कुलम् । कृतप्रणामः पुरुषः । कृतप्रणामा स्त्री । कृतप्रणामं कुलम् । कारिके स्त्रियौ । कारिकाः स्त्रियः । कारकौ पुरुषौ । कारकाः पुरुषाः । कारके कुले । कारकानि[41] कुलानि । इत्यादि । एवमन्येऽपि कृत्तद्धितसमासेषु लिंगसंख्यानियमो ज्ञातव्यः । आख्यातिकप्रत्ययस्तु न लिंगं ग्रहीतुमर्हति[42] । उक्तस्य संख्यामात्रमुपादत्ते । तद्यथा । उदनं पचति सूपकारः । उदनं पचतः सूपकारौ । उदनं पचति सूपकाराः । उदनं पचति स्त्री । उदनं पचतः स्त्रियौ । उदनं पचन्ति स्त्रियः । उदनं पचति कुलम् । उदनं पचतः कुले । उदनं पचन्ति कुलानि । एवं कटः क्रियते देवदत्तेन । कटौ क्रियेते देवदत्तेन । कटाः क्रियन्ते देवदत्तेन । एवं सर्वत्र । त्वंयुवांयूयमित्येभिर्योगे पुनर्युष्मादिमध्यम इति मध्यमपुरुषो[43] भवति । यथा त्वं भवसि । युवां भवथः । यूयं भवथ । एवं त्वं हन्यसे देवदत्तेन । युवां हन्येथे देवदत्तेन । यूयं हन्यध्वे देवदत्तेन । एवम सर्वत्र अहमावांवयमित्येभिर्योगे तु नरस्मद्युत्तम इत्युत्तमपुरुषो[44] भवति । तद्यथा । अहं भवामि । आवां भवावः । वयं भवामः । एवं अहं हन्ये देवदत्तेन । आवां हन्यावहे देवदत्तेन । वयं हन्यामहे देवदत्तेन । एवं सर्वत्र । अन्यत्र तु नाम्नि प्रयुज्यमानेऽपि[45] प्रथमः पुरुषो भवति । तद्यथा । देवदत्तो भवति । देवदत्तौ भवतः । देवदत्ता भवन्ति । अभिभवति

---

[33] संबंधो

[34] तदस्यास्तीति मंत्वंत्वीन्

[35] प्रपण्चं तु

[36] वा

[37] एनं

[38] कारकसंबंधे

[39] समासो वा

[40] संख्यया च

[41] कारकाणि

[42] ग्रहीतुमर्हतीत्युक्तस्य

[43] मध्यमः पुरुषो

[44] इत्युत्तमः पुरुषो

[45] प्रयुज्यमानेऽपि प्रथम इति

त्वां देवदत्तः । जानाति मां देवदत्तः[46] । पच्यते[47] उदनस्त्वया । क्रियते कटो मया । (मया स्थीयते । त्वया भूयते ।)[48] एवं सर्वत्र लिंगसंख्यानियमः कथितः । उक्तं तु प्रथमकारिकायामुदाहृतमेव तच्च दिग्मात्रमिदम्[49] । अन्यत्राप्याख्याकृत्तद्धितसमासैरेवोक्तम्[50] युक्तितः प्रतिपत्तव्यम् । यदा भावे प्रत्ययः । तदा न किंचिदुक्तं भवति । तत्राकर्मकेभ्यो धातुभ्यो भावविहितप्रत्ययो[51] भवति । सकर्मकेभ्योऽपि[52] भवति । यदि कर्म न विवक्ष्यते । प्रयोगः । भूयते देवदत्तेन । स्थीयते युवाभ्याम् । पच्यते अस्माभिः । गम्यते देवदत्तेनेत्यादि । भावः सत्ता । सत्ता चासंख्येति तस्यामभिधेया यामौत्सर्गिकमेकवचनं प्रथमपुरुषस्यैव भवति । भावविहितकृत्प्रत्ययानां[53] तु प्रयोगे कर्मकारकमपि विवक्षणीयम् । भावेऽपि धात्वर्थकृता व्याप्तिरस्तीति न्यायात्प्रयोगः[54] । यथा ग्रामं गंतुं उद्यतः[55] । उदनं भुक्त्वा व्रजति । एवमन्यत्राप्यूहनीयम् । ननु यस्य प्रधानक्रियासंबंधादुक्तत्वम् । अनुक्तत्वं च गुणक्रियाभिसंबंधात्तादृशं सकलमेवोक्तं भवतीत्यपि वक्तव्यम् । तेन उदनः[56] पक्त्वा भुज्यते । उक्तार्थत्वादोदने प्रथमैव । अन्यथा अनुक्तद्धारेण द्वितीयाऽपि स्यात्सत्यं प्रधानानुयायिनो व्यवहाराः ।[57] तत उद्गस्य कर्मणः प्रधानशक्तिश्चेत् भुजिक्रियानिबंधनाभिहिता[58] पचनक्रियानिबंधनाऽपि अप्रधानशक्तिरभिहिवत्[59] प्रतिभासते[60] ततः कुतो अनभिहते विहतानां द्वितीयादीनामवकाशः । तदुक्तं प्रधानशक्तिरभिधाने[61] गुणशक्तिरभिहितवत् प्रकाशत इति । साध्यत्वात्[62] भोजनक्रियायाः प्राधान्यम् । गौणत्वं च कृदंतक्रियायास्तद्विशेषनत्वादिति एवं देवदत्तो भुक्त्वा व्रजति । इत्यादावपि न्यायस्य तुल्यत्वादुक्ते कर्तरि प्रथमैव भवति[63] न कदाचिदनुक्तद्धारेण तृतीया । एवमन्यत्रापि तस्मादुक्तत्वस्य न्यायादेव सिद्धत्वादिह विशेषो न वक्तव्य इति ।

४.
लिंगसंख्याभियोगश्च प्रायो भवति दर्शितः ।
वेदाः प्रमाणमित्यादि प्रयोगो येन सम्मतः ॥ ४ ॥

---

[46] यज्ञदत्तः
[47] एवं पच्यते
[48] त्वया भूयते । मया स्थीयते ।
[49] तच्च दिग्मात्रम् ।
[50] --समासैरुक्तं अत एव
[51] तत्राकर्मकधातुभ्यो भावे विहितः प्रत्ययो
[52] पाठान्तरे अपि नास्ति ।
[53]भावे विहित-
[54] न्यायात्
[55] गंतुमुद्यतः
[56] उदनं
[57] स्यात् । सत्यं प्रधानानुयायी जनव्यवहारः ।
[58] -भिहितः
[59] अप्रधानाऽपि शक्ति-
[60] प्रकाशते
[61] प्रधानशक्त्यभिधाने
[62] साध्यत्वात्पाद्यंतभोजन--
[63] पाठांतरे भवति नास्ति

लिंगसंख्येत्यादि । सुबोधम् । प्रमीयते येन तत्प्रमाणमिति । करणाधिकरणयोश्चेति अधिकरणे[64] युट् ।

५.
मुख्यं कर्तारमाचष्टे प्रत्ययोऽनेककर्तृको ।
मुख्यः प्रयोजको ज्ञेयः प्रयुक्तो नापरैर्यदि ।। ५ ॥

मुख्यमित्यादि । अयमर्थः । आनककर्तृके धातौ कर्तरि विहितः प्रत्ययो मुख्यमेव कर्तारमाचष्टे मुख्यश्च प्रयोजको ज्ञातव्यः प्रयत्नवत्त्वात् । नौ वेदसौ[65] प्रयोजकोऽपरैः प्रयुक्तो भवेत् । प्रयुक्तो हि अन्य एव प्रयत्नवानिति तस्यैव प्राधान्यम् । तद्यथा । यदा यज्ञदत्तेन प्रयुक्तो देवदत्त उदनः पचति । तदा पचति कश्चित् तमन्यः प्रयुङ्क्ते इति वाक्ये धातुश्च हेताविति । पचधातोरिन् कर्तरि परस्मैपादं प्रयोगः पाचयत्योदनं देवदत्तेन यज्ञदत्तः । उक्तार्थत्वात् यज्ञदत्ते कर्तरि प्रथमा । देवदत्ते कर्तरि कर्तर्यनुक्तत्वात्तृतीया । यदा तु देवदत्तस्य प्रयोजको यज्ञदत्तो विष्णुमित्रेण प्रयुक्त सन् पाचयति । तदा अनया रीत्या पाअह्यतो इनंतादपि पुनरिन्प्रयोगः । पाचयत्योदनं देवदत्तेन यज्ञदत्तेन विष्णुमित्रः । अत्र प्रधानत्वादुक्ते विष्णुमित्रे कर्तरि प्रथमा । अनुक्ते तु सर्वत्र तृतीया । ईदृशी सार्वत्रिकी नीतिः ।

६ (१).
दुहादेर्गौणकं कर्म

दुहादेरित्यादि । अस्यायमर्थः[66] दुहादेः कर्मणि जातः प्रत्ययो गौणमेव कर्म वक्ति न प्रधानम् । अभिधानात् । दुहादयो । दुहियाचिरुधिप्रच्छिभिक्षिविञामुपयोगनिमित्तमपूर्वविधौ बुविशासिगुणेन च यत्स च एतदकीर्तितमाचरितं कविना इति[67] । अत्र चकारेण जयतिप्रभृतीनामपि ग्रहणम् । जयत्यर्थयतेर्मथिस्तुर्यो दंडयतीत्यपि एभिः महद्बुद्धैर्ज्ञेया द्वादशेते दुहादयः । दुह्यते गौःपयो गोपालकेन । याच्यते पौरवः कंबलं बटुना । रुध्यते गौर्व्रजं गोपालकेन पृच्छ्यते छात्रः पंथानं पथिकेन भिक्ष्यते पौरवो गां द्विजेन वक्षोऽवचीयते फलानि लोकैः उच्यते शिष्यो धर्ममुपाध्यायेन । शिष्योऽनुशिष्यते शास्त्रं पण्डितेन । एवं ग्रामः शतं जीयते छात्रेण । गर्ग्राः शतं दंड्यते नृपेण । प्रार्थ्यते गां गृहमेधी द्विजेन मथ्यते स्म जलधिरमृतं देवासुरैः । अत्रौपयुज्यमानं पयःप्रभृतिकं कर्मप्रधानं अतस्तन्निमित्तं गवादिकं गौणम् । गौणत्वात्कर्मणि विहितेनात्मनेपदेनोक्तमित्युक्ते कर्मणि प्रथमा । अनुक्ते तु द्वितिया॥

६ (२).
नीवहादेः प्रधानकम् ।

---

[64] पाठांतरे अधिकरणे नास्ति
[65] न वेदसौ
[66] पाठांतरे नास्ति
[67] कविनेति

नीवहादेः प्रधानकमिति । कर्मजः प्रत्ययः कर्म वक्तीति प्रत्येकमभिसंबंधः । तत्र नीवहादयो यथा नीधोत्द्योह्र्युत्कृषोश्चापि गत्यर्थानां तथैव च द्विकर्मकेषु ग्रहणं ण्यंते कर्तुश्च कर्मणः प्रयोगो यथा । नीयते भारो ग्रामं देवदत्तेन । उत्द्यते भारो ग्रामं देवदत्तेन । ह्रियते कुंभो ग्रामं देवदत्तेन। अजा ग्राममाकृष्यते जनेन । अत्र भारादेर्नीयमानस्य प्रधानत्वात् उक्तत्वं ।

६ (३).
इनंते कर्तृकर्मैव अन्यद्वा वक्ति कर्मजः ॥ ६॥

इनंते कर्तृकर्मेवान्यद्वेति । अयमर्थः । इनंते धातौ पूर्वकर्ता सन् यः पश्चात्कर्म भवति तत्कर्म कर्मजः प्रत्यतो वक्ति । अन्यद्वा ग्रामादिकं कर्म । अयमभिप्रायः। शिष्टप्रयोगानुसारेण इनंते पर्यायेण कर्मोक्तं भवति । इति टीकाकारः। तद्यथा ग्रामं गम्यते देवदत्तो यज्ञदत्तेन । ग्रामो देवदत्तमिति वा । एवमोदनं भोज्यते देवदत्तो यज्ञदत्तेन । उदनो देवदत्तमिति वा । बोध्यते धर्मं शिष्योऽध्यापकेन । धर्मः शिष्यमिति वा । माणवकोऽध्याप्यते वेदमुपाध्यायेन माणवकं वेद इति वा । मासमास्यते देवदत्तो यज्ञदत्तेन । मासो देवदत्तमिति वा । अकर्मकाणां प्रयोगे कालाद्ध्वभावादेशानां कर्मसंज्ञा सिद्धैवेति मासस्य कर्मत्वम् । कालादिभिर्योगेऽप्यकर्मकाणामनिनि सति यः कर्ता स इनि[68] व्याप्य विवक्षयां कर्मसंज्ञो भवति । ननु यदि पर्यायोऽत्र सम्मतः । तत्कथमिनंते[69] कर्तृकर्मैवेत्येवकारः[70] । सत्यं गत्यर्थादेः कर्तृकर्मैवेति नियमस्य केषांचिदभिमतत्वात्प्रायश्चैनमेव पक्षमाश्रित्य प्रयोगः कर्तव्यः । अपरस्तु पक्षः संभवात्दर्शित इति ।

७.
गमनाहारबोधार्थशब्दार्थाः कर्मधातुषु ।
अनिनंतेषु यः कर्ता स्यादिनंतेषु कर्म तत् ॥ ७ ॥

गमनाहारेत्यादि। सर्वत्र अनिनि सति यः कर्ता तस्येनि सति व्याप्यत्वात् कर्मतापत्रौ नियमः । प्रयोगः । गत्यर्थानां तावत्ग्रामं गच्छति देवदत्तः । ग्रामं गमयति देवदत्तं यज्ञदत्तः । (यातुं नेच्छति । तेन यापयति ग्रामं देवदत्तेन यज्ञदत्तः ।)[71] संपदं प्राप्नोति चैत्रः । प्रापयति संपदं चैत्रं नृपः । आहारार्थानां यथा । उदनं भुंक्ते देवदत्तः । भोजयत्योदनं देवदतमीश्वरः । पयः पिबति चातकः । पाययति पयः चातकं जलदः । बोधनार्थानां यथा बुध्यते शिष्यो बोधयति धर्मं शिष्यमुपाध्यायः । पश्यति चैत्रं मित्रः । चैत्रं दर्शयति मैत्रं विष्णुमित्रः । शब्दार्थानां यथा । पठति शास्त्रं शिष्यः । पाठयति शास्त्रं शास्त्रं शिष्यमुपाध्यायः । आभाषते मैत्रं देवदत्तः । मैत्रमाभाषयति देवदत्तं यज्ञदत्तः । अकर्मकाणां यथा । उत्पद्यते घटः । घटमुत्पादयति कुलालः । [72]मासमास्ते देवदत्तः । मासमासयति देवदत्तं यज्ञदत्तः । कोशमास्ते व्रीहिः । कोशमासयति व्रीहीन्कृषीवलः[73] उदनपाकं स्वपिति देवदत्तः । उदनपाकं स्वापयति देवदत्तं यज्ञदत्तः । एवं सर्वत्र गत्यदर्थादीनां कर्म प्रतिपत्तव्यं यदा तु गत्यर्थादीनां इनंतानां अपरहेतुविवक्षया पुनरिन् । तदाग्रामं गमयति देवदत्तं यज्ञदत्तेन विष्णुमित्रः । इत्यादिकमुन्नेतव्यं कर्मणि तु ग्रामं

---

[68] इनि सति
[69] किमिनंते
[70] कारेण व्यवच्छिद्यते
[71] पाठांतरे नास्ति
[72] एवं मासमास्ते
[73] व्रीहिं कृषीवलः

गम्यते देवदत्तः यज्ञदत्तेन विष्णुमित्रेणेत्यादि । ननु अत्र प्रयोगे विष्णुमित्रप्रेरितं यज्ञदत्तस्य कर्मत्वं प्राप्नोति कथं कर्तृत्त्वं सत्यं इहतीनां अर्थांतरगमनादेरर्थस्य गुणीभूत् न यज्ञदत्तस्य[74] कर्मत्वम्। अत एव गमिन्प्रभृतीनां गत्यर्थलक्षणः क्तः प्रत्ययः कर्तरि न भवतीति । यद्येवं ग्रामाय गमयतीति । गत्यर्थनिबंधना कर्मणि चतुर्थी[75] न स्यात् । गतेरर्थस्य गुणीभूतत्वात् । गौणमुख्ययोश्च मुख्ये कर्य संप्रत्ययः[76] इति । सत्यं ग्रामाय गच्छति देवदत्तः[77] । तं यज्ञदत्तः प्रयुङ्क्ते ततः प्रथमत एव ग्रामात् चतुर्थी । पश्चादिति सति सर्वमनवद्यम् ।

८.
न नीखाद्यऽदिशब्दाय क्रंदाह्वा कर्तृकर्मकाः ।
तथा भक्षिरहिंसायां वहो सारथिकर्तृकः ॥ ८ ॥

न नीत्यादि । णीञ् । खाद् । अद् । शब्दाय । क्रंद आह्वा क्रेञ्[78] । एते कर्तृकर्मका न भवन्ति । कर्ता कर्म येषाम् ते कर्तृकर्मकाः । एषामनिनि सति यः कर्ता स इनि सति कर्मसंज्ञो न भवति[79] । यावत् प्रयोगः । नाययति भारं ग्रामं देवदत्तेन यज्ञदत्तः । गत्यर्थत्वात्प्राप्तप्रतिषेधः । (खादयत्योदनं देवदत्तेन यज्ञदत्तः)[80] । आदयति वा भिक्षार्थत्वे अनयोः प्राप्ते[81] प्रतिषेधः । शब्दायधातुः । शब्दाययति कीवाकैर्मारुतः । शब्दार्थत्वे प्राप्ते प्राप्ते[82] प्रतिषेधः । क्रंदयति बालकेन दुर्जनः । अकर्मकत्वे प्राप्तप्रतिषेधः । देवदत्तमाह्वायति यज्ञदत्तेन विष्णुमित्रः । शब्दार्थत्वे प्रतिषेधः । तथा भक्षिरहिंसायां इति कर्तृकर्मको न भवति । इति संबंधः । प्रयोगः । भक्षयति पिंडी देवदत्तेन यज्ञदत्तः हिंसायां गम्यमानायां पुनर्विधिरेव । भक्षयति पतंगान् पक्षिणं कपोतः[83] । भक्षयति हिंसा गम्यते बाहाः[84] सारथिकर्तृक इति अत्रापि कर्तृकर्मको न भवतीति संबंधः । न भवति सारथिः कर्ता यस्य सो सार्थिकर्तृकाः अनियंतृकर्तृक इत्यर्थः । प्रयोग" । वाहयति भारं ग्रामं वंठेन देवदत्तः सारथिकर्तृकस्य विधेरेव । यथा वाहयति बलीवर्दान् सस्यं ग्रामं सारथिः । एवमन्येऽपि ।

९ (१).
ह्वक्रोरपि तथा कर्ता इनंते कर्म वा भवेत् ।

ह्वक्रोरित्यादि । तथेति व्याप्य विवक्षया इत्यर्थः । ह्वृदृशोर्गतिबोधार्थतया प्राप्ते विभाषा । कृञ् अभिवद्योऽस्य प्राप्ते । प्रयोगः । हारयति भारं ग्रामं देवदत्तं यज्ञदत्तः । देवदत्तेनेति वा कारयति कटं देवदत्तं यज्ञदत्तः । देवदत्तेनेति वा ।

---

[74] गुणीभूतत्वात्कुतो यज्ञदत्तस्य
[75] चतुर्थ्यपि
[76] प्रत्ययमिति
[77] देवदत्तं यज्ञदत्तः ।
[78] हस्तप्रते अस्पष्टम् ।
[79] भवतीति
[80] खादयति गृद्धपुत्रेण पत्नी आदयत्योदनं देवदत्तेन यज्ञदत्तः
[81] पाठांतरे नास्ति
[82] पाठांतरे नास्ति
[83] पोतः
[84] वाहाः

९ (२).
अभिवादिदृशोरेवमात्मने विषये परम् ॥ ९ ॥

अभिवादिदृशोरित्यत्र अभिवादीति वदेर्घञंतादिन्[85] चौर्तादिको पश्चाद्धेताविन् । अभिवादयते तनयं गुरुं जनकः । तेन येनेति वा दर्शयते भृत्यमात्मानं राजा । भृत्येनेति वा । आत्मनेपदविषये[86] एवाभिवादिदृशोरिति[87] नियमात् । परस्मैपदविषये यथा प्राप्तमेव । अभिवादयति भृत्येन स्वामिनं लोकः । अत्र कर्तृविवक्षैव । चैत्रं दर्शयति मैत्रं[88] विष्णुमित्रः । दृशोर्बोधार्थतया कर्मत्वमेव । गत्यर्थादिभ्यो दृशिपर्यंतेभ्योऽन्येषामनिनि सति यः कर्ता[89] इति अस्यापि । कर्तैव भवति । न कर्म । तद्यथा । पाचयत्योदनं देवदत्तेन यज्ञदतः । दापयति गां चैत्रेण विष्णुमित्रः । पयो दोहयति गां गोपालेन[90] देवदत्तः । एवमन्येऽपि । पूर्विकयैव नीत्या सर्वत्रे[91] निपुनर्हेताविन् ।

१० (१).
उक्तादन्यदनुक्तं स्यादुक्त स्यात्प्रथमैव हि ।

उक्तादनुक्तप्रतिपादनादनंतरं विभक्तीनामुपक्रमः । उक्ते स्यात्प्रथमैव हि एव शब्दोऽत्रावधारणे उक्ते कारके संबंधे वा प्रथमैव विभक्तिर्भवति । प्रथमा विभक्तिर्लिंगार्थवचन इति वचनात् । नान्या द्वितीयादय उक्तत्वात्[92] । उक्तार्थानामप्रयोग इति वचनात् । अयमभिप्रायः । कर्मेत्यादिप्रतिपादनाय[93] द्वितीया विधीयन्ते । यत्र तु कर्मत्वादि प्रतिपादनमन्यैरेव कृतं तत्र द्वितीयादयः कथं भवन्तीति । तद्यथा देवदत्तो भवति । कटः क्रियते । स्नानीयं वर्णम् । दानीयो ब्राह्मणः । उत्सन्नजनपदो[94] देशः । आसनं पीठम् । गोमान् देवदत्तः । एवमन्येष्यनुसर्तव्याः । उक्तविभक्तिं प्रतिपाद्याऽनुक्तां विभक्तिसामान्येन[95] प्रतिपादयन्नाह ।

१०(२).
अनुक्ते तु भवन्त्यन्या द्वितीयाद्या यथायथम् ॥ १० ॥

---

[85] अभिवादेर्घञंतादिन्
[86] आत्मने विषये
[87] एवादिदृशोरिति
[88] मित्रं
[89] कर्ता स
[90] गोपालकेन
[91] सर्वत्रैव हेताविन्
[92] उक्तार्थत्वात्
[93] कर्मत्वादिति प्रतिपादनाय द्वितीयादयो
[94] उच्छिन्नजनपदो
[95] अनुक्तविभक्तिं

अनुक्ते त्वित्यादि[96] अनुक्ते पुनः प्रथमां वर्जयित्वा अन्य द्वितीयाद्यो विभक्तर्यो यथायथं भवन्तीति । या विभक्ति द्वितीयादीनामन्यतमा यत्रार्थविहिता सा तत्र भवतीति । यथायथमित्यस्य परिमितोऽर्थः । अत आरभ्ययथायथमित्रनेन सूचितोऽनुक्तं विभक्तिनां नियमः प्रतिपाद्यते । कर्तसंज्ञे तृतीया स्यादिति । कर्तृसंज्ञे कारके तृतीया भवति । कर्तरि चेति वचनात् । यः प्रधानतया क्रियासिद्धौ व्याप्रियते सः क्रियां करोती निष्पादयति कर्तृसंज्ञो भवति । तद्यथा । एवदतः काष्ठैः स्थाल्यमोदनं पअह्ति इति अत देवदत्तः कर्ता अत्र हि देवदत्तेन प्रयोजितः कारकसमूहो ज्वलनादिनिजव्यापारद्वारेण क्रियामभिविवैर्तयतीति[97] । तद्यथा । देवदत्त एव प्रयत्नवान् । ततः स एवैकः प्रधानतया कर्ता । नान्यत् काष्ठादिकम् । एवं सर्वत्र स अह द्विधा । स्वतंत्रो हेतुश्च । तत्र प्रयोजक उक्तप्रकारो देवदत्तादिः स्वतंत्रो य करोति स कर्तेत्यस्य कर्तृसंज्ञः हेतुः । स च त्रिप्रकारः । प्रेषको हेतुः । स च चन्द्रमा । आनुकूल्यभागी वा । तत्र यः प्रेषते प्रभुत्वेन नियुङ्क्ते स प्रेषकः । इत्यत्र देवदत्तो हि स्वामी कटकरणाय भृत्यमाज्ञापूर्वकं नियुङ्क्ते । यः पुनरध्येषते सत्कारपूर्वकं नियुङ्क्ते । यः पुनरध्येषते सोऽध्येषकः । यथा यज्ञदत्तो गुरुं भोजयति इत्यत्र यज्ञदत्तः सत्कारपूर्वकं गुरुं[98] नियुंक्ते । यः पुनः प्रयोज्यस्य क्रियकरणायानुकूल्यभावं[99] भजते न प्रेषते नाप्यध्येषते स आनुकूल्यभागी भवति[100] । स च द्विविधः । सचेतनोऽचेतनश्च । तत्र सचेतनो यथा सुपुत्रो जनकं हर्षयति । इत्यत्र सुपुत्रो हि जनकस्य हर्षणे आनुकूल्यतां[101] भजन्नेवं[102] तत्र तं नियुंक्ते । अचेतनस्तु प्रयोजको भवन्नानुकूल्यभागीपरं भवति न प्रेषको नाप्यध्येषकः । अचेतनस्य प्रेषणाध्येषणे कर्तुमयोग्यत्वात् । यथा कारीषोऽग्निरध्यापयति माणवकमित्यत्र[103] कारीषोऽग्निर्ज्वलत् । शीतादिकमपनयन्नध्ययनानुकूलतां भजन् अत्र तं प्रयुंक्ते[104] ।

११ (१).
कर्तृसंज्ञे तृतीया स्यात्

इत्यत्र प्रयोजकत्वं कारयति यः स हेतुश्चेति हेतुसंज्ञा कर्तृसंज्ञा च स एवं प्रकारः कर्ता यदानुक्तो भवति तदा तृतीया वेदितव्या[105] । प्रयोगः । देवदत्तेन क्रियते कटः । यज्ञदत्तेन कार्यते भृत्येन कटः । विष्णुमित्रेण भोज्यते उदनं गुरुः सुपुत्रेण मोद्यते जनकः कारीषेणाध्मयते मावणकः । एवं त्वया कृतम् । मया उक्तम् । एवमन्येऽपि ।

११ (२).

---

[96] अनुक्तविभक्तिं
[97] क्रियामभिवर्तयन्तीव
[98] गुरुं भुङ्क्ते
[99] -कूल्यमात्रं
[100] भवति पाठांतरे नास्ति
[101] हर्षोदययानुकूल्यमात्रं
[102] भजन्नेव
[103] माणवकं इत्यत्र कारीषः प्रज्वलितोऽग्निः
[104] नियुंक्ते
[105] पाठांतरे नास्ति

द्वितीया कर्मकारके ।

द्वितीया कर्मकारके स्यादिति संबंधः । शेषाः कर्मकरण इत्यादिना यत्क्रियते तत्कर्मेति वचनात् । कर्तुः क्रियया यत्क्रियते यद्व्याप्यते यस्य कर्तुः क्रियायाव्यप्तिरस्तीति तत्कारकं कर्मसंज्ञं भवति । तच्च त्रिविधम् । निर्वर्त्यं विकार्यं प्राप्यं चेति । तत्र यन्निर्वर्त्यते निष्पाद्यते । अविद्यमानमेवोत्पाद्यते तन्निर्वर्त्यम् । यथा कुलालः कुंभं करोति । अत्र कुंभो ह्यविद्यमानो मृदा उत्पाद्यते । अत" कुलालस्य कर्तुः करणक्रियया कुंभस्य स्वरुपं प्रत्यनुलंभो जन्ममात्रं प्राप्तिरुच्यते । यद्विक्रियते स देवान्यथा क्रियते तद्विकार्यम् । यथा काष्ठं दहति देवदत्तः । इत्यत्र काष्ठं स एव हि दाहेनान्यथाक्रियते अतो देवदत्तस्य कर्तुर्दाहक्रियया काष्ठानाम्न्यथाभावो विकारोऽत्र प्राप्तिरुच्यते । तदपि द्विविधम् । एवं प्रकृत्यच्छेदभूतं पूर्वोक्तमेव । अपरं गुणोत्तराधानद्वारेण । व्ययदेशांतरं यथा । सुवर्णं कुंडलं करोति अत्र हि कुंडलस्य व्यपदेशेन सुवर्णस्य प्रतिमा विद्यते । एवं देवकुलं धवलयतीत्यादावपि वेदितव्यम् । यदपूर्वं नोत्पाद्यते नाप्यन्यथाक्रियते अपि तु सदैव प्राप्यविषयीक्रियया विषयतया[106] संबद्धो भवति । वेदस्य संबंध एव चात्र प्राप्तिरुच्यते तदेवं प्रकारं कर्म यदानुक्तं भवति । तदा द्वितीया वेदितव्या । प्रयोगः । कुंभं करोति कुंभकारः । काष्ठं दहति देवदत्तः वेदमधीते विप्रः । एवं कटं कृतवान् देवदत्तः । गां पयोदोग्धुं व्रजति गोपालकः । एवं सर्वत्र । तयोरथ भवेत्षष्ठी कृतिनिष्ठादिवर्जिते इति । तयोरनुक्तयोः कर्तृकर्मणोः निष्ठादिवर्जितकृत्प्रयोगे[107] षष्ठी भवति । कर्तृकर्मणोः कृति नित्यमिति वचनात् । निष्ठादिप्रयोगे तु कर्तरि तृतीया कर्मणि द्वितीया भवति । न निष्ठादिष्विति षष्ठी प्रतिषेधात् । कर्तरि यथा । भवत आसिका । भवतः शायिका । पर्यायाहरणेषु चेति[108] ।

भावे बुञित्यनुक्तः कर्ता कर्मणि यथा उदनस्य पाचको देवदत्तः । पक्त्वा वा । पुरांभेदको हरः । भेत्ता वा । अनेककर्मकाणां तु यावकर्मानुक्तं भवति तावत्कर्मण्यनुक्ते[109] षष्ठी भवति । न तु प्रधान एव कर्मणि[110] विशेषाभावात् । तद्यथा । गवां दोहकः पयसो गोपालकः । दोग्धा वा । अजाया ग्रामस्य नायको देवदत्तः । नेता वा । ग्रामस्य देवदत्तस्य गमको यज्ञदत्तः । गमयिता वा । मासस्य मैत्रस्य आसको देवदत्तः । आसयिता वा । एवं सर्वत्र द्विकर्मकेषु यत्रापि कर्मत्रितयं तत्रापि षष्ठी सर्वत्र भवति । यथा कुंभस्य भारस्य वंठस्य हारको यज्ञदत्तः । हारयिता वा । एवं[111] शिष्यस्य धर्मस्य अध्यापकस्य वाचको मैत्रः । वाचयिता वा । ब्रूञ्शब्दार्थतया प्रयोज्यस्य कर्तुः कर्मत्वम् । एवं सर्वत्र । बुणतृचौ[112] कर्तरि विहितावित्यनुक्तं कर्म । इह गत्यर्थकर्मणि कृत्प्रयोगेऽपि न षष्ठीति अभिधानात् कश्चित् गत्यर्थकर्मणि चतुर्थी भवति[113] सिद्धे द्वितीयाग्रहणं प्रयत्नं[114] ज्ञापयति तन्मते । ग्रामं गंता देवदत्तः । ग्रामाय गंता देवदत्तः वा । एवं ग्रामं गमयिता देवदत्तस्य यज्ञदत्तः । ग्रामायेति वा । इत्यादिकं भवति । अत्र च टीकाकारस्य न संमतं[115] न चैवं शिष्टाप्रयोगा दृश्यंते । इत्यनाअरादऽस्माभिरुपेक्षित एवायं पक्षः । अथोदनस्य भृशं पाचक इत्यादिप्रक्रियाविशेषणे कर्मणि कथं न[116] षष्ठी । सत्यम् । उदनस्य[117] पाचकः । कटं

[106] हस्तप्रते अस्पष्टम्
[107] निष्ठादिवर्जिते कृत्प्रयोगे
[108] वेति
[109] यावत्कर्मण्यनुक्ते
[110] कर्मणि षष्ठी
[111] पाठांतरे नास्ति
[112] बुण्तृचौ
[113] वेति
[114] द्वितीयाग्रहणप्रयत्नो
[115] मतं
[116] न कर्मणि कथं

Formatted: Justified

करोतीत्यत्र कथं कटात्षष्ठी न भवति । अथ करोतीत्यस्य कटं कर्म न तु पाचकस्य इति कृदंतस्य धातोः तत्कृतः[118] । कृदंते कर्मणि विधीयमाना षष्ठी कथं कटात् भवितुमर्हति[119] । यद्येवं तर्हि क्रियाविशेषणेऽपि समानं यतः सर्वोऽपि धात्वर्थः । करोत्यर्थे न व्याप्त इति गम्यमाने[120] करोति क्रियाद्धारेणैव क्रियाविशेषणस्य कर्मत्वं न चैवम् । मासस्यासक इति गम्यमानप्रापणक्रियाया मासः कर्मेति न षष्ठी प्राप्नोति । यतस्तत्रांतर्भूतप्राप्तिक्रियेषूपवेशनादिषु आसिप्रभृतयो वर्तन्त[121] इति । सिद्धांतदासिक्रियाया एव मासः । कर्मेति तत्क्रियाव्यतिरिक्तस्य क्रियांतरस्य[122] गम्यमानस्येत्यलमिति जल्पितेन[123] कृतिनिष्ठादिवर्जित इति । तत्र निष्ठादयः । क्तक्तवंतुशंतृड् । आनथं सुकि उदंत[124] । उकञ् तृन् अव्ययखलर्थाः । तत्र क्तो यथा । गतो ग्रामं देवदत्तः । गतो ग्रामो देवदत्तेन । गत्यर्थाकर्मकेत्यादिना कर्तृकर्मणोः क्तः । एवं पयोगौ दुग्धा देवदत्तेन । उदनः पचितो देवदत्तेन । यज्ञदत्तेन । भावकर्मणोरित्यादिना कर्मणि क्तः । कर्तरि कृदिति । कर्तरि प्रत्ययोऽयं भवति । निष्ठेति वचनात् । सर्वत्र क्तवंतुशंतृड् यथा उदनं पचन् सूपकारस्तिष्ठति । ग्राममजां नयन् यज्ञदत्तः क्लिश्यति । वर्तमाने शंतृडानशावित्यादिना कर्तरि शंतृडानशौ आनश् प्रत्ययस्तु । न केवलं कर्तरि आनोऽत्रात्मने इति वचनात् । [125]भावेकर्मणि च भवति । एवं क्वंसुकानौपरोक्षावत्वैति वचनात् । क्वंसुकानौ । क्वंसु कर्तरि । आनशवत् कानस्त्रिष्वपि भवति । आनेति कान-आनशसानडासु उत्कृष्टानुबंधानां[126] ग्रहणं तत्र कानो यथा । कटं चकाणो देवदत्तः । पयोगां दुदुहानो गोपालकः इति कर्तरि । कटश्चकाणो देवदत्तेन । पयोगौर्दुदुहनो गोपालकेनेति कर्मणि । आनश् यथा उदनं पचमानो गायति सूपकारः । ग्राममजां नयमानः पुरुषः क्लिश्यति इति कर्तरि । सूपकारेण पच्यमानो निष्पद्यते उदनः । अजा ग्रामं[127] नीयमाना न[128] पलायते । इति कर्मणि । शानड् यथा कतीहनिघ्नानाः[129] कवचमुद्वहमाना क्षत्रियकुमाराः[130] । कतीह मधुलिहानः वित्तानाः शक्तिः वयस्ताच्छील्य इति शानड् कर्तर्येव भवति । वंस्विति क्वंसुवंसोर्ग्रहणं सुवं क्वंसुर्यथा । उदनं पेचिवान् सूपकारः गोपयो दुदुद्वान् गोपालक इति कर्तर्येव वंसुर्यथा । कटं चिद्वान् देवदत्त इति । वेत्ते शंतुर्वंसुरिति शंतृड्प्रत्ययस्य वंसुरादेशः । किर्यथा[131] । कटं चक्रि देवदत्तः । दधिर्घटं देवदत्तः । आट्द्वर्णो यथा लोपि नांकिद्धै चेति वचनात्[132] कर्तरि किप्रत्ययो द्विवर्धनं च उदंतेति यावदुकारांतानां कृत् प्रत्ययानं ग्रहणम् । तद्यथा । कन्यामलंकरिष्णुः पिता । ग्रामं गमयिष्णुर्देवदत्तं यज्ञदत्तः । भ्राज्यलंकृञ्भूसहि इत्यादिना[133] तशीलतद्धर्मतत्साधुकारिष्विति इष्णु च[134] कर्तर्येव भवति । एवम पटं

---

[117] ओदनय

[118] कर्मत कृतः

[119] कटाद्भवति

[120] गम्यमान

[121] वत्वत

[122] व्यतिरिक्तक्रियांतरस्य

[123] जल्पनेन

[124] आनावत्सूकि उदंत

[125] आनो भावेकर्मणि

[126] ऋष्टानुबंधानां

[127] मानवेन

[128] पाठांतरे नास्ति

[129] पाठांतरे नास्ति

[130] -मानः क्षत्रियः कुमारः

[131] किं यथा

[132] पाठांतरे नास्ति

[133] भूरित्यादिना

[134] तच्छीलतद्धर्मतत्साधुकारिष्विष्णुर्भवति

चिकीर्षुस्तंतुवायः । बुभुक्षुरोदनं पैंडपातिकः । तच्छीलादिषु सनंताशंसिभिक्षासु कर्तर्येव उकञ् यथा । कन्याम कामुको वरः ग्रामं गामुको जनः तशीलादिषु शुकमगमेत्यादिना[135] उकञ् कर्तर्येव तृन् यथा । सर्वज्ञातासु गतः मुंडयितारः श्राविष्टायिना भवन्ति । वधूमूधावदिता जनापवादात् तृन् । कर्तर्येव । अव्ययेति । अव्ययानाम कृत्प्रत्ययानां ग्रहणम् । तदुक्तं क्त्वामकारांतश्च कृत्स्वभावादसंख्य इत्यव्ययमेवेति । तथा क्त्वामकारान्तकृत्प्रत्ययप्रयोगो[136] भावे भवति इति । निश्चितम् । तत्र क्त्वा यथा । ग्रामं गत्वा देवदत्तो भुङ्क्ते । गां पयो दुग्ध्वा गोपालको विक्रीणितो एवं भवंतं[137] प्रणम्य स्वजनो[138] गतः । एककर्तृकः पूर्वकाले इयनेन क्त्वा प्रत्ययः[139] समासे भाविनीत्यादिनाय चादेशः । मकारांतो यथा । कटं कर्तुं देवदत्तस्तिष्ठति । ग्राममजां नेतुमुपक्रमेत् लोकः । बुण्तुमौ क्रियायां क्रियार्थायामिति तुम् । एवं भावं भावमिह जलबुद्बुदा इव विपद्यंते । क्षणं संपदः । तत्र खल यथा विपद्यंते संपदः भूप्राप्ताविह **आत्मनेपदीयम्वाभीक्ष्यद्विश्चपदमिति** णम् द्विर्वचनम् । खलार्थेति[140] खल् युप्रत्ययोर्ग्रहणम् । तत्र खलु यथा । ईषत्करः काटा भवता । दुःप्रायं धनमव्यवसायिभिः[141] । सुलभो धीमता विपदंतः सुलभो वीर्यवतारिवदहः ईषद्दुःसुखकृच्छ्रार्थेषु खल् । युर्यथा । ईषत्पानो हि सोमो दीक्षितेन[142] । दुर्याणा अटवा ग्राम्येण सुदानं धनमीश्वरेण । आढ्याद्य दारिद्रातेरिति युः । एवं दुःशासनो दुर्गस्थः परिपंथी पार्थिवेन दुःशासोऽसौ वा । शासियुधिदृशिमृषिमृषां वेति विकल्पेन युः । योरन्यत्र पूर्ववत् खल् अयमेव युप्रत्ययो दर्शितः । खलर्थे ज्ञातव्यः न पुनर्सुदुर्द्वेत्यादिना विहितोऽपि भवकर्मणोः कृत्यक्तखलर्था भवन्ति । एवमन्यदप्युदाहरणं एषां यथा सूत्रमेव प्रतिपत्तव्यम् । एवं पक्षे निष्ठादिषु अंगीकरणात्कृत्यानां कर्तरि षष्ठी वा भवति । तद्यथा । देवदत्तस्य कटः कर्तव्यः । कार्यः । करणीयः । कृत्यो वा । देवदत्तेनिति । तव्यानीयौ वर्णव्यंजनांताद्ध्यण् । कृदृषिमृषां वेति क्यप् । एवं सर्वत्रानेककर्तृकाणामपि यावत् कर्तरि विकल्पेन षष्ठी भवति । पाचयितव्य उदनो देवदत्ताय यज्ञदत्तस्य देवदत्तेन यज्ञदत्तेन वा । एवमिन्द्वयेऽपि । तद्यथा । पाचयितव्य उदनो देवदत्तस्य यज्ञदत्तस्य विष्णुमित्रस्य देवदत्तेन यज्ञदत्तेन विष्णुमित्रेणेति वा । एवं सर्वत्र । ननु कथं राज्ञां माता देवदत्त इत्यादौ ज्यनुबंधेत्यादिना वर्तमाने विहितस्य[143] क्तप्रत्ययस्य प्रयोगे कर्तरि षष्ठी भवति[144] । ननु क्तोऽपि निष्ठादिषु अंगीकृतोऽस्ति । सत्यमिह कर्तुः संबंधविवक्षया षष्ठी । तथा क्तोऽधिकरणे च । ध्रौव्यगतिप्रत्यवसानार्थेभ्य इत्यनेन आधारे विहितस्य क्तप्रत्ययस्य संबंधे कर्तरि षष्ठी ज्ञातव्या । तद्यथा । तिष्ठति स्म ग्रामे यस्मिन् देवदत्तः स स्थितो ग्रामो देवदत्तस्य । एवं गतो ग्रामो देवदत्तस्य । भुक्तं कांस्यभाजनं विष्णुमित्रस्य । एवमन्यदपि । एवं भावविहितस्य क्तप्रत्ययस्य कर्तरि संबंधे वा षष्ठी भवति । यथा । त्वया कृतम् । (मया कृतम्)[145] । एवं सर्वत्र नप्युंसके भावे क्तः । अयं तु विशेषः । प्रायसहः कविता एवेत्यादिश्लोकेन[146] संग्रहीष्यते ।

---

[135] श्रुकमेत्यादिना
[136] प्रत्ययोऽपि
[137] भगवन्तं
[138] सुजनो
[139] पाठांतरे नास्ति
[140] खलर्थेति
[141] -सायिना
[142] भवता
[143] वर्तमानविहितस्य
[144] न्हिष्ठादित्वात्
[145] पाठांतरे नास्ति
[146] एवेत्यादिना श्लोकेन

१२ (१).
एकदा तूभयप्राप्तौ[147] कर्मण्येव न कर्तरि ।

एकदा त्वित्यादि । एकदा तूभयप्राप्तौ कर्मण्येव न कर्तरि । अकाकारप्रयोगे तु षष्ठी स्यादुभयोरपि । एकदा पुनः एकस्मिन् काले कृत्प्रयोग इति यावत् । उभयो कर्तृकर्मणोः षष्ठीप्राप्तौ कर्मण्येव षष्ठी भवति । न कर्तरि । ता उभयप्राप्ति यत्र द्वेऽपि कर्तृकर्मणी अनुक्ते तिष्ठतः प्रयोगः । पाचयिता भक्तस्य देवदत्तेन यज्ञदत्तः । पाचको वा । नाययिता ग्रामस्य भारस्य भृत्येन पतिः । नायको वा । एवमिनद्वयेऽपि तद्यथा । पाचयिता उदनस्य देवदत्तेन यज्ञदत्तेन विष्णुमित्रः । पाचको वा । ग्रामस्य गमयिता देवदत्तस्य यज्ञदत्तेन विष्णुमित्रः । गमको वा । एवमादिषु सकर्मकाणां अनेककर्तृकाणां प्रधानमेव कर्तारं कर्तृविहितः । प्रत्ययो[148] वक्तीति उभयप्राप्तिः । अतो यावत्कर्मणि षष्ठी भवति । अनुक्ते यावत्कर्तरि तृतीया । एवं दोग्धव्या गौःपयसो गोपालकेन । नेतव्यो भारो ग्रामस्य वंठेन । गमयितव्यो अध्यापकः शिष्यस्य धर्मस्य चैत्रेण नाययितव्यो भारो ग्रामस्य वंठेन । स्वामिन । गत्यर्थानामिनद्वयेऽपि । गमयितव्यो देवदत्तो ग्रामस्य यज्ञदत्तेन विष्णुमित्रेणेत्यदि । एवमादिष्वनेककर्तृकर्मणोः कर्मणि विहितः प्रत्ययो दुहादेर्गौणकं कर्मेत्यादिवचनादेकमेव कर्म वक्तीति । उभयप्राप्तिरतोऽनुक्ते यावत्कर्मणि षष्ठी । कर्तरि तु सर्वत्र तृतीयैव । तेन कृत्यनां कर्तरि वेत्यनेककर्मकेषु कर्तरि[149] न प्रवर्तत इति । कश्चित् । वयं तु ब्रूमः । (उभयप्राप्तो कृत्येषु कर्मणि षष्ठी न भवति)[150] । ततश्च दोग्धवया गौःपयो गोपालकेन । नेतव्यो भारो ग्रामं वंठेनेत्यादिकमेव भवति । न तु पूर्वोक्तदर्शित उदाहरणप्रपंचः । एवं सत्युवर्मे स्तौत्यमापद्य इति सूत्रं उवर्णस्त्वाद्यमापादनीया । इत्येतद्विवरणम च द्वयमुपपन्नम् । तथा जयादित्योऽपि कृत्यानां कर्तरि वेत्यत्र सूत्रे पतदेव दर्शयति । तद्यथा । उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः । वाढव्या[151] ग्रामं शाखा देवदत्तेन । नेतव्या ग्राममजा देवदत्तेनेति स्थितम्[152] । भावप्रत्ययेऽपि सकर्मकाणामुभयप्राप्ताविति वचनात् यावकर्मणि षष्ठी यावत् कर्तरि तृतीयैव । प्रयोगः । उदनस्य पाको देवदत्तेन पचनं वा । गवां दोहः पयसो गोपालकेन दोहनं वा । नयो ग्रामस्य भारस्य वंठेन नयनं वा । श्रिणीभूभ्यो उपसर्ग इति नायतेर्भावे घञ् । उदनस्य पाचनं देवदत्तेन यज्ञदत्तेन । ग्रामस्य गमनं चैत्रस्य विष्णुमित्रेण । नयनं भारस्य ग्रामस्य वंठेन स्वामिना । इन्द्वयेऽपि उदनस्य पाचनं देवदत्तेन यज्ञदत्तेन विष्णुमित्रेण । ग्रामस्य गमनं चैत्रस्य विष्णुमित्रेणेत्यादिकमुन्नेयम् । सर्वत्र भावे युद्वेति घञ् युटौ एवं कृञादीनामिनंतानां पक्षद्वयेऽपि रुपं सुबोधमेव । भारं भारस्य हारो ग्रामस्य देवदत्तेन यज्ञदत्तेन हारणं वा ननु कथमाश्चर्यो गवां पयसो दोहो गोपालकस्येति कर्तरि षष्ठी । सत्यं कर्तुः संबंधविवक्षायां षष्ठीत्यदोषः । आश्चर्यो गवां पयसो दोहो गोपालकेनेत्यपि कर्तरि भवत्येव । स्मृत्यर्थकर्मणीति सिद्धे कर्तृकर्मणोः कृति नित्यमित्यत्र पुनः कर्मग्रहणं उभयप्राप्तौ कर्मण्येव नियमार्थ उक्तमिति सर्वतोभयप्राप्तौ कर्मण्येवेति नियमे प्राप्ते विशेषमाह ।

१२ (२).

---

[147] एकदा तूभयप्राप्तौ
[148] अप्रत्ययो
[149] पाठंतरे नास्ति
[150] अनेककर्मकेषूभयप्राप्तो कृत्ये षष्ठी न भवति
[151] आकृष्टव्या
[152] पाठांतरे नास्ति

अकाकारप्रयोगे[153] तु षष्ठी स्यादुभयोरपि ॥ १२ ॥

अकाकारप्रयोगे तु षष्ठी स्यादुभयोरपि । अकेति बुञ् ग्रहणं तस्य युबुञित्यादिना केरुपच्चात् । अकारेति अअडोर्ग्रहणमेषां प्रयोगे कर्तरि कर्मणि वोभयत्रापि षष्ठी भवति । अको यथा पाचिका भक्तस्य देवदत्तस्य । गवाम दोहिका पयसो गोपालकस्य । एवमत्यत्रापि यावत्कर्तरि कर्मणि षष्ठी कर्तव्येति । अलम प्रपंचेन । पर्यायाहरणेषु वेत्यत्र भावमात्रेऽपि दृश्यते[154] इति वचनात् । भावमात्रेऽपि बुञ् यथा चिकीर्षा कटस्य देवदत्तस्य जिहीर्षा भारस्य ग्रामस्य वंठस्यापि पाचयिता भक्तस्य सूपकारस्य देवदत्तस्य ।एवम इनद्वयेऽपि पिपाचिषा भक्तस्य देवदत्तस्य यज्ञदत्तस्य विष्णुमित्रस्य इहमि सर्वत्र षष्ठी तु प्रयोग मालया संसिप्रत्ययादः अड्यथा । उदनस्य पचास्त्रीणां भिदाकारि कुंभस्य केसरिणः[155] । सुबोध एवास्य विषयः । षानुबंहभिदादिभ्यस्त्वड् । एवमादिकमकारयोर्द्वयोर्विधायकं सूत्रं[156] प्रतिपाद्य प्रयोगः कर्तव्यः । अन्येषां तु स्त्रीलिंगभावप्रत्ययानां कर्तरि विभाषया षष्ठी । तद्यथा । विचित्रा सूत्रस्य कृति शर्ववर्मणेत्यादि ।

१३.
प्रायसः कथिता एव दृश्यंते कर्तृकर्मणोः ।
यथाऽभिधानमन्यासां प्रवृत्तिर्न निराकृता ॥ १३ ॥

प्रायसो बाहुल्येन यथायथं कथिता एव विभक्तयः कर्तृकर्मणोर्दृश्यंते । ततस्ता एव कथिताः अन्यासां विभक्तीनां यथाऽभिधानं प्रयोगानतिक्रमेण प्रवृत्तिर्न निराकृता । अपि[157] तु प्रयोगानुसारेण प्रवत्वंतामित्यभिप्रायः । तद्यथा । गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामन ध्वनि । ग्रामाय गच्छति ग्रामं गच्छति । ग्रामं गंतुम् । ग्रामाय गंतुम् । इत्यादि गमेः साहचर्यात् । इहैककर्मका एव धातवो ग्रहीतव्याः[158] । तेन ग्राममजां नयतीत्यादिष्वनेककर्मकेषु न चतुर्थी भवति । एवमन्यकर्मणि चानादरे प्राणिनि । न त्वां तृणं मन्ये न त्वाम तृणाय मन्ये इत्यादिस्मृत्यर्थकर्मणि । मातुः स्मरति । मातरं स्मरति । मातुरध्येति । मातरमध्येति । मातुः स्मरयति । मातरं स्मरयति । मातुः स्मर्तुं मातरं स्मर्तुमित्यादि कपोतेः प्रतियत्ने एधोदकस्योपस्कर्तुं एधोदकमुपस्कर्तुमित्यादि । (एवमनुकरोति नारायणम कर्मणि द्वितीया अनुकरोति । नारायणस्य संबंधे षष्ठी । एव हिंसार्थानामद्वारः । दास्याः भजति रोगः । दासीमिति वा । चौरस्याज्ञातया चौरमिति वेत्यादि)[159] । एवं व्यहृपणिदिवीनां व्यवहारार्थानां यथा । शतस्य व्यवहरति । शतं व्यवहरति । शतस्य दीव्यति । शतं वा । शतस्य पणायते शतं वा । एवमाशिषिनाथः । सर्पिषामाधते सर्पिर्वा । एषु व्यवहरति प्रभृतिषु कर्मणः पक्ते संबंधविवक्षया षष्ठी प्रतिपत्तव्याः । एवं[160] कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा विवक्षायाम (पशुना रुद्रं यजते । पशुं वा रुद्राय यजते । संज्ञो)[161] अन्यतरस्यां तृतीया । पुत्रेण संजानीते । पुत्रं वा । एवं क्तस्य चेत्विषयस्याधिकरणविवक्षया सप्तमी । अधीती व्याकरणे

---

[153] अकारकप्रयोगे च

[154] दृश्यत

[155] कुंभकेसरिणः

[156] विधाअनसूत्रं

[157] अन्या अपि

[158] परिग्रहतव्याः

[159] पाठांतरे नास्ति । उचितमेव ।

[160] एवं पक्षे

[161] पाठांतरे नास्ति

अध्ययनमधीतं नपुंसके भावे क्तः । तदस्यास्त्रीति इन् । एवमन्यत्रापि विवक्षायां विभक्तयो दृष्टव्याः । एवं पूर्वदर्शितो विभक्तिभेदोऽत्र श्लोको आनीय प्रतिपत्तव्यः ।

१४.
तृतीया करणे प्रायश्चतुर्थी संप्रदानतः ।
पंचमी स्यादपादाने तथाऽधारे तु[162] सप्तमी ॥ १४ ॥

तृतीया करणे प्रत्ययश्चतुर्थी संप्रदानतः । पंचमि स्यादपादाने तथाऽधारे तु सप्तमी । करणे कारके प्रायस्तृतीया भवति । शेषाः कर्मकरणेत्यादिना कर्ता येन क्रियते येन कर्तुः क्रियासिद्धि भवेत्[163] । यत्कारकं कर्तुः क्रियासिद्धोपकृष्टे ये कारकं विवक्षितं तत्कारकं येन क्रिया तत्करणमिति करणसंज्ञं भवति । तच्च द्विविधम् । बाहय्माभ्यंतरं चेति । तयोः शरीरमाश्रितमाभ्यंतरम् । तस्मादन्यत् बाह्यम् । तत्र आभ्यंतरं यथा । मनसा गच्छति । चक्षुषा दृष्टम् । बाह्यं यथा । दात्रेण लुनाति । अश्वेन गच्छति इत्यादिना प्रायस इति वअह्नेनान्यापि विभक्तिर्यथाऽभिधानम् । ज्ञातव्याः इति सूचितम् । तद्यथा । स्तोकेन मुक्तस्स्तोकान्मुक्तः । अल्पेन मुक्तः अल्पान्मुक्तः । कृच्छ्रेण कृच्छान्मुक्तः कतिपयान्मुक्तः कतिपयेन मुक्तः । स्तोकाल्पकृच्छ्रकतिपयस्यासन्नवअह्नस्याप्यवतिविवक्षायां करणे पंचमी । एवं सर्पिषो जानीते । ज्ञोविदर्थस्य करणे संबंधे षष्ठी । एवमादिकं यथाभिधानं ज्ञातव्यम्[164] । चतुर्थी संप्रदानतः स्यात् इति प्रत्येकमभिसंबंधः । शेषाः कर्मकरणेत्यादिना पूजानुग्रहकाम्यया यस्मै दातुमिच्छा तत्कारकं संप्रदानसंज्ञं भवति । यस्मै दिशेत्यादिनो त्च त्रिविधम् । अनुमंतृनिराकर्तृप्रेरकं[165] । (त्यागकारणं व्याप्येनाप्तं ददातेस्तु संप्रदानं प्रकीर्तितम्)[166] । तद्यथा यत् ददामीत्युक्ते । एवं कुरुष्वेत्यनुमन्यते । तदनुमंतृ । यथा गुरवे गां ददाति । यत् देहीति भवति भणित्वा दातारं प्रेरयति । तत्प्रेरकम् । यथा बटवे भिक्षां ददाति । यन्नानुमन्यते नापि प्रेरयति । किंतु न निराकरोति । तूष्णीमास्ते । तदनिराकर्तृ यथा बुद्धाय[167] मालां ददाति । अत्रापि प्रायस इत्यनेन संबंधः । [168]तस्या संप्रयच्छते सुवर्णं कामुकः । दाण्सावेच्चतुर्थ्यर्थे[169] इति आत्मनेपदम् । अशिष्टसमाचारे संप्रदानस्य करणविवक्षयां तृतीया । एकमन्यत्रापि यथाभिधानं विभक्तिभेदो ज्ञातव्यः ।

१४ (२).
पंचमी स्यादपादाने तथाऽधारे तु[170] सप्तमी ॥ १४ ॥

---

[162] च
[163] कर्ताक्रियासिद्धौ
[164] मंतव्यम्
[165] -प्रेरकं चेति
[166] पाठंतरे नास्ति
[167] चैत्राय
[168] तद्यथा तस्या
[169] -चतुर्थ्यर्थ
[170] च

पंचमी स्यादपादान इति । शेषाः कर्मकरणेत्यादिना तत यतोपैतीत्यादिना अपादाने पंचमी । संज्ञावधिभूतस्य सीमारुपेण विवक्षितस्य कारकस्यापादानं संज्ञा[171] भवति । तच्च द्विविधम् । चलमचलं च । तत्र चलं यथा । धावतोऽश्वात्पतितः । अचलं यथा वृक्षात्पर्ण पतति । एवं व्याघ्राद्बिभेति । उपाध्यायादधीते इत्यदिकमवधिरुपं वेदितव्यम् । ननु वृक्षस्य पर्ण पतति इति कथं षष्ठी । सत्यम् । संबंधविवक्षया हि एतेन विवक्ष्यते हि कारकाणि भवन्ति । इति दर्शितम् । तद्यथा । स्थाल्यां पचति । तथा स्थाल्यां पचति । स्थाली पचति देवदत्तः इत्यादावेकस्य[172] नानाविधा विवक्षया[173] दृश्यन्ते । यदा पुनरनायासेन क्रियमाणे[174] कर्मणि कर्ता स्वव्यापारमारोपयति । तदा विवक्षया कर्म कर्ता भवति । तद्यथा । पच्यते उदन स्वयमेव । अलाति केदारः स्वयमेव । इत्यदिकर्मवत् कर्म कर्तेति कर्मकर्तुः । कर्मवद्भावादात्मनेपदम् । तस्मिन् सति यण् इवौ भवतः । इत्योदने[175] इत्यादौ कर्मण्युक्तत्वात् प्रथमा । पचेलिमा तंडुलाः स्वयमेव । कर्मकर्तरि केवलिनः । वत्करणं स्वाश्रयार्थमिति भावेऽपि कर्मकर्तुः प्रयोगो भवत्येव । यथा पच्यते उदनेन स्वयमेव । अनुक्तात्वात्[176] कृत्प्रकरणे कर्मवद्भावो न भवति । तेन कर्म कर्तरि कर्मविहितः कृत्प्रत्ययो न भवन्ति[177] । कर्तव्यं कटेन स्वयमेव । ईषत्करः कटेन स्वयमेव । एवं कर्मकर्तुर्विशेषसूत्रं तत्र प्रत्येतव्यं इति स्थितम् । तथाऽधारे तु सप्तमी । तथेति स्यादित्यर्थः । शेषाः कर्मकरणेत्यादिना (आधारे सप्तमी आधारश्च)[178] क्रियाश्रयभूतः कर्ता कर्म वा यत्राध्रियते यत्र कर्तृकर्मणी अवतिष्ठेते । स आधारो य आधारस्तदधिकरणमित्याधारस्याधिकरणसंज्ञा । स च[179] चतुर्विधः । उपश्लेषिकोऽभिव्यापिको वैषयिकः सामीपिकश्चेति । तत्र उपश्लेषः संयोगः । तत्रभवः उपश्लेषिकः । यथा कटे आस्ते देवदत्तः । एवं स्थाल्यां पचत्योदनम् । य अधेयमभिव्याप्य तिष्ठति सोऽभिव्यापको यथा तिलेषु तैलमस्ति । विषयो गोचरोऽनन्यत्रभावस्तत्रभवो वैषयिको यथा । दिवि देवाः सन्ति । समीपे निकटेभवः सामीपिको यथा । गंगायां घोषोऽस्तीति । एवं सर्वत्र ।

१५ (१).
संबंधेऽथ भवेत्षष्ठी निर्नयस्तावदीदृशः ।

संबंधेऽथ भवेत्षष्ठी निर्नयस्तावदीदृशः[180] । (उक्तानुक्तविचारेण प्रयोगस्तेन गम्यताम्)[181] । शेषाः कर्मकरणेत्यादिना (संबंधे षष्ठी)[182] राज्ञः पुरुषः युवयोः पुत्रः[183] युष्माकं धनमित्यादि अत्रैकक्रियाकृतः संबंधो भवति । स च परस्परापेक्षारुप उच्यते ।

---

[171] अपादानसंज्ञा
[172] -कस्यापि
[173] नानाविवक्षा
[174] क्रियमाणतया
[175] उदन
[176] अनुक्तत्वात् कर्तरि तृतीयेत्यादित्वात्
[177] पाठांतरे भवति ।
[178] पाठांतरे नास्ति
[179] पाठांतरे नास्ति
[180] पाठांतरे नस्ति
[181] पाठांतरे नास्ति
[182] पाठांतरे नास्ति
[183] पुरुषः

तथा हि राज्ञः पुरुषः इति परिपालना क्रिया कृतोऽनयो संबंधः राजा हि परिपालयति पुरुषश्च परिपाल्यते । गतो राजापरिपालयतीत्युक्ते कमिति विशेषापेक्षायां राजा पुरुषेण संबद्धो भवति । पुरुषः परिपाल्यत इत्युक्ते केनेति विशेषविवक्षायां राज्ञा पुरुषः संबद्धो भवति । एवं सर्वत्र संबंधो ज्ञेयः । परस्परापेक्षा च द्वयोरप्यास्ति संबंधः । तर्हि राजशब्दवत् पुरुषशब्दादपि न कथं षष्ठी । सत्यं देवदत्तः स्थाल्यामोदनं काष्ठैः पचतीत्यादवाप्युक्तेन प्रकारेण परस्परापेक्षया सर्वत्र विद्यते एव परस्परापेक्षारुपः[184] संबंध इति कथमिह प्रत्येकं संबंध षष्ठी । अथैवं वक्तव्यम् । (सर्वतो विद्यते एव)[185] । यदि नाम प्रत्येकमभिसंबंधस्तथापि मैवासौ वक्तुमिष्टः । कर्तादेरर्थस्य तदानीं विवक्षितत्वात् विवक्षिते चार्थे तदभिधायी शब्दः प्रयुज्यते इति कुतः षष्ठीप्रसंगः । यद्येवमिहापि प्रतिपाद्यतया लिंगार्थः प्रधानमिति पुरुषशब्दात् प्रथमैव न च षष्ठी सतोऽपि संबंधस्यापि विवक्षितत्वात् । अत एवोक्तं भेद्यभेदकयोः श्लिष्टिः संबंधोऽन्योन्यमिष्यते । द्विष्ठो यद्यपि संबंधः । षष्ठ्युत्पत्तिस्तु भेदकात् इति तस्मात् विवक्षितेऽर्थे तदाभिचायी शब्दः प्रयुज्यते इति स्थितं । अत एव विवक्षितत्वात् इत न्यायः सर्वत्र गीयते । सर्वविभक्तिष्वेकस्मिन्नार्थ एकवचनम् ।द्वयोरर्थायार्द्विवचनं बहुष्वर्थेषु बहुवचनम् । अन्वर्थबलात्प्रतिपत्तव्यम् । समानाधिकरणे तु[186] विशेषणस्य[187] विशेष्यस्य च एका विभक्तिर्भवति तदुक्तम् ।

यां विशेष्ये तु दृश्यंते लिंगसंख्याविभक्तयः ।
प्रायस्ता एव कर्ताया समानार्थे विशेषणे ॥ तद्यथा । कटः क्रियते दर्शनीयो विपुलः क्रियते इति प्रत्येकमभिसंबंधात् प्रथमा । एवं सर्वत्र न्यायोऽवगंतव्यः । तद्यथा । कटौ क्रियेते दर्शनीयौ विपुलौ । कटाअः क्रियन्ते दर्शनीयाः विपुलाः । एवं करोति कटं दर्शनीयं विपुलं देवदत्तेन कृतम् । ब्राह्मणाय वेदपारगाय गां देहि । महतो वृक्षात्पर्णं पतति । वृद्धस्य राज्ञः पुरुषः । आकारो व्यापिनि शकुनयः सन्ति । एवं द्विवचनबहुवचनेऽपि प्रतिपत्तव्ये । यद्येव कथं विंशतिः कटाः क्रियन्ते इति । सत्यं स्वभावात् विंशतिशब्दोऽयं एकवचनांत एव भवति इति विशेष्यस्य विभक्तिमात्रमुपादत्ते । एवमन्यदपि विज्ञेयम् । ननु तथापि क्रियन्ते इति कथं बहुवचनं विंशितोरेकवचनांतत्वादतह कटा इति बहुवचनांतेन पदेन संबंदहददोषः । ननु भवतु मा मैवम् । तथापि क्रियापदस्य प्रत्येकमभिसंबंधो अनंतरमुपदर्शितः । ततो विंशतिशब्दसंबंधादेकवचनमपि प्राप्नोति । न केवलं कटा इति संबंधाद्बहुवचनम् । सत्यं प्रधनत्वाद्विशेष्यस्य तत्संख्यामेवोपादत्ते इत्यादि यथा तंतवः पटीक्रियन्ते इति प्रधानत्वात् प्रकृतिसंख्या । अत्र हि तंतवः प्रकृतिभूताः । प्रधानं विकारस्तु तन्मूलत्वादप्रधानं पटः । एवं कृत्तद्धितसमासेष्वपि वक्तव्यः । तद्यथा । विंशतिः कटाः क्रीताः । विंशतिर्वैयाकरणाः । विंशतिः पुरुषाः कृतप्रणामा इत्यादि विशेष्यस्य लिंगसंख्ये समानाधिकरणे विशेषणे प्रतिपत्तव्ये । प्रधानं पुरुष इत्यादौ पुनः अविष्टलिंगत्वात्प्रधानादयो न विशेष्यस्य लिंगं[188] भजन्ते इति । अत एव लिंगसंख्येत्यादिकायां प्रायोऽभिहितमिति[189] । तदेवमुक्तानुक्तम् । प्रतिपाद्यविभक्तिं च दर्शयित्वा नियमन्नाह[190] । निर्नयस्तावदीदृशः ।

१५ (२).
उक्तानुक्तविचारेण प्रयोगस्तेन गम्यताम् ॥

---

[184] परस्परापेक्षारुपश्च
[185] पाठांतरे नास्ति
[186] पाठांतरे नास्ति
[187] विशेषणे
[188] विशेष्यलिंगं
[189] कारिका प्रागभिहितेति
[190] निगमयन्नाह

उक्तानुक्तविचारेण प्रयोगस्तेन[191] गम्यतामिति । तावत्शब्दः क्रमापेक्षया ईदृशस्ता च हेतुना उक्तानुक्तविचारेन प्रयोगो गम्यताम् । देवदत्तेन कटः क्रियते इत्यादि रुपं वाक्यं साध्यसाधनलक्षणं गम्यताम् । प्रतिपाद्यताम् । क्रियन्तामिति यावत् । शिष्यैरिति संबंधः । गम्यतामिति गमेरिनंतस्य रुपमिदम् । गम्यमानार्थस्य प्रयोगं प्रतिकामचार इति श्लोके शिष्यैरिति नोक्तम् । तद्यथा । पर्वतः सुमेरुरित्येवायं[192] प्रयोगः । तत्र साध्यते इति साध्यं क्रियाधात्वर्थः । क्रियाचयेन साध्यते तत्साधनं कारकषट्कम् । यथोक्तं क्रियानिमित्तं कारकं लोकतः सिद्धम् । येन च पदसमुदायेन साध्यं साधनं च प्रतिपाद्यते । तद्वाक्यं वक्तव्यम्[193] ।
तत एव हि शब्दो व्यवहारः प्रवर्तते । तस्यैव निराकांक्षतया प्रवृत्तिनिवृत्तिहेतुत्वात् । तद्यथा । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि वाक्यं प्रवृत्तिहेतुः । ब्राह्मणो न हंतव्यः इत्यादि निवृत्तिहेतुकम् । न चैवं केवलस्य पदस्य प्रवृत्तिनिवृत्तिहेतुत्वं क्वचिद् भूयते[194] । अतः शाब्दो व्यवहारः क्रियमाणो बहुभिरेव पादैः कर्तव्य इति ज्ञात्वाऽपि पदसिद्धिमेकैकशः कदाचित् मंदमतयो बहुपदयोजनायां जनाः संदिहीरन् । अतः कारकसंबंधोद्योतसंपादयन्नाह स्थित एवायमस्माकं तानुद्दिश्य परिश्रम इति ।

इमां विंशतिसंयुक्तां अधिगम्य चतुःशतीं ।
आस्ता सरभसो लोकः संबंधोद्योतसिद्धितः ॥

इति षट्कारकनामावृत्तितः रभसनंदविरचितः संबंधोद्योतः षट्कारकापरनामा वृत्तितः॥
अक्षरमात्रपदस्वरहीनं व्यंजनसंधिविवर्धितरेफं ।
सूरिभिरेवमक्षमितव्यं को न विमुह्यति शास्त्रसमुद्रम् ।।
रभसनंदविरचितं षट्कारकमलेखि ।

[191] निर्नयस्तेन
[192] सुमेरुरित्येव वा
[193] पाठांतरे नास्ति
[194] क्वचितदपि श्रूयते